श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ अवतारगीतम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ अवतारगीतम् ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

पाण्ड्यभूपतेः पुण्यमूर्तये सागरान्तरातन्वते गतिम्।
वेधसे पुरा वेददायिने मीनरूपिणे ते नमो नमः॥ 1 ॥

मन्दराचलं बिभ्रते सुखं देवदानवाकृष्टमञ्जसा।
सम्यगाहितं स्वेन पाणिना कूर्मरूपिणे ते नमो नमः॥ 2 ॥

अम्बुधेर्जले दैत्यमज्जितां रक्षितुं धरां वेधसो नसः।
जन्मकारिणे यज्ञमूर्तये क्रोडरूपिणे ते नमो नमः॥ 3 ॥

गर्भगोऽपि यं नारदेरितं चित्तगर्भगं स्तम्भगर्भगम्।
अर्भको व्यधात्त्वां तदा मुदा सिंहरूपिणे ते नमो नमः॥ 4 ॥

भिक्षवे क्षितेः भक्तपुत्रजान्मानघातिने मानकारिणे।
गोत्रभेदिने तत्प्रदायिने खर्व ! ते नमो वृद्धिमीयुषे॥ 5 ॥

दत्तदत्तया मत्तया श्रिया बाहुपूरितं बाहुजं पुरा।
छिन्नबाहुकं हन्त ! तन्वते रामरूपिणे ते नमो नमः॥ 6 ॥

यज्ञरक्षिणे जानकीयुजे यायिने वनं यातुघातिने।
सेतुकारिणे शर्मदायिने रामरूपिणे ते नमो नमः॥ 7 ॥

सीरपाणये नीलवाससे शेषमूर्तयेऽशेषवाहिने।
हस्तिनानदीकर्षिणे क्रुधा रामरूपिणे ते नमो नमः॥ 8 ॥

देवकीभुवे नन्दनन्दिने गोविहारिणे गोपबन्धवे।
वेणुगायिने वेत्रपाणये कृष्णरूपिणे ते नमो नमः ॥ 9 ॥

भाविने कलेरन्तकारिणे कल्किरूपिणे ते नमो नमः।
इत्थमुच्चरन्नीशमानमन्नीप्सितं जनो विन्दतेऽखिलम् ॥ 10 ॥

॥ इति अवतारगीतं समाप्तम् ॥

sunder kidāmbi prapatti dot com sunder kidāmbi